मनःसम्बोधनम् ॥

कृष्णानन्दसरस्वतीप्रणीतम् ।

वामार्धेन प्रणयकुपितं दक्षिणेनानुनेतुं
सान्त्वानत्यञ्जलिषु घटते यत्परं भावभेदैः ।
भावाश्लेषप्रमदसुभगम्भावुकं भावुकं तत्
भूयात् द्वन्द्वं भुवनपितरौ भूयसे श्रेयसे नः ॥

१

चेतश्चेतस्तत इति परिभ्रम्य किं खिद्यसे त्वं
लब्धालब्धैरसुलभसुखैरर्थकामैरनर्थैः ।
विश्राम्येत क्षणमपि सखे खेदसंशान्तये ते
वक्ष्याम्येकं गलितनिखिलापायमेषोऽभ्युपायम् ॥

२

पश्येदानीमखिलजगतीमन्तकस्यान्तरस्था-
माशाभङ्गं परिमृश भृशं भूयसाप्युद्यमेन ।
लब्धेनापि स्मर परिणतौ भोगवैरस्यमन्तः
स्वेनैव त्वं शमसुखरसं ज्ञास्यसे शान्तवाहि ॥

३

आयासेनाकलय कियता तारकाधिष्ण्यमाप्य
पश्यस्यासामपि च पतनन्त्वम्मधूकावपातम् ।
कालेनेदं किल कवलितं जीर्यति ब्राह्मनण्डं
विस्रम्भस्ते वपुषि क इवायं पयोबुद्बुदे वा ॥

४

एकद्वा न ह्यवनिपतयः कालसाद्भूतभावा-
नद्वित्रास्ते हृदयसुहृदो नाममात्रावशेषाः ।
षट्पञ्चा न प्रतिभयमहाव्यापदस्तेनुभूताः
सप्ताष्टानप्यनुदिनमिदं चिन्तयान्तर्निमेषान् ॥

५

निर्वाणाय स्मर हरपदं संस्मर प्राणवृत्त्यै
चेतश्चिन्तां चिरमनुगतामुच्चकैरुज्जहाहि ।
शालूरस्य प्रकटतमसो योऽपि पाषाणगर्भे
धत्ते वृत्तिं स किमिह न ते कल्पयिष्यत्यधीशः ॥

६

हन्ताश्रान्तं भवमरुपथेऽलभ्यविश्रान्तिभूमा-
वामानुष्यादसुखबहुलादा च सत्यादवीचेः ।
यातायातश्रममनुभवन् यातना यातयामं
सर्वो लोकः किमिति न मनो दृश्यते ते कदापि-

७

आरम्भास्ते कति न विफला निष्ठितौ भूतपूर्वाः
स्वसंरम्भेण द्रविणमरुवाः सानुतर्षं पिपासोः ।
प्रत्याशाया विरम विषयोल्लापनाया न यावत्
प्रत्यासीदत्त्वयि जडमनः सर्वकृन्तः कृतान्तः ॥

८

यावत् तृष्णा भवति विषये यत्तदेवेह दुःखं
लब्धे तस्मिन्नुपरमति सा यत्क्षणं तत्सुखं ते ।
तामुत्पत्तिं हृदय निपुणो रुन्धि नित्यं सुखाप्त्यै
पङ्कालेपं परमनुकलं क्षालने मा यतिष्ठाः ॥

९

दुःखं जन्तोरुपनमति यन्निष्प्रतीकारभोगं
तत्प्रत्यक्षं तव च नियतं नन्वनायस्यतोऽपि ।
तत्सामान्यं विषयजसुखे पश्यतावश्यभाव्यं
शान्तेनान्तर्हृदय भवता मत्प्रियं कुर्वता वा ॥

१०

स्वच्छन्देन प्रणयविषये मास्म भूस्त्वं यथेदं
बाह्याबाह्यं कलयसि पदं देहलीदीपभङ्ग्या ।
बाह्याभ्यन्तस्सुखतुलनया तत्र मध्यस्थवृत्त्या
वैरस्यं त्वं विषयजसुखे वेत्स्यसि स्वात्मनैव ॥

११

स्वाधोन्माथिन्युपवदति यत्तत्प्रतीकारनिष्ठा-
मातिष्ठेथा हृदय दुरितायाससाहश्चिराय ।
त्वय्यैतस्मिन् वपुषि सकलानर्थहेतौ कथं ते
सर्वोत्साहप्रतिकृतिपदे सर्वथैवानुबन्धः ॥

१२

एतत्कार्यं कृतमिदमयं कार्यशेषो ममेति
व्यासङ्गेन स्मरसि हृदय श्रेयसो न प्रमादात् ।
किं कर्तासि प्रियमविदाति ह्यस्तनं श्वस्तनं वा
दिष्टादिष्टेन्द्रियमतिवधे जन्मनि त्वं तिरश्चाम् ॥

१३

श्वोभावि श्वः कुशलमिति मा लालसादर्शदश्यै-
राशामोदैरफलय तृषामानुषं सानुषङ्गम् ।
ईदृक्क्षेमक्षममिह कदा भावि ते जन्म चेतः
श्रेयोमार्गानभिमुखमहं त्वानुयातो हतोऽस्मि ॥

१४

जन्मावश्यं तव शिवपदध्यानहीनस्य यस्मिन्
भोक्तासे त्वं हृदय विवशं दुर्दशामेकमेव ।
तामेवास्मिन्ननुभव तपोभावितामीशवृत्त्या
भावायत्तं परशिवपदं लप्स्यसे तावतैव ॥

१५

रागस्यन्दाहितमधुरिमा मानसार्थस्त्वयाक्षा
जीर्णोपानत्त्वगिव (च) शुना लौल्यलालारसार्द्रा ।
स्वादुङ्कारं स्वरसविरसो भुज्यते रज्यतैव
त्वामप्राज्ञं क इव महते मास्तृणीयेत लोकः। (?)

१६

प्रासादाग्रं प्रमदवनिका पद्मिनीकेलिशैलः
सोऽहं सम्राडिति किमयथाफल्गुसङ्कल्पनेन ।
सर्वेशोऽस्मीत्यवितथमये चित्त सङ्कल्पयेथाः
पाथःप्रायं पिबति मनसा कः पयः पातुकामः ॥

१७

अक्षैरर्थानुपहरदिव स्वेन सङ्कल्पितान् वा
मामुल्लोभं हृदय समनस्कारमभ्यश्नुषे तान् ।
मोघात्मार्थो मुहुरनुविदन्नेव ते निष्ठितोऽहं
ग्रासं ग्रासं परमभिलषन्नश्नतो वा बिडालम् ॥

१८

संख्यातीतं गतरुजमपि स्यात्परायुःसहस्रम्
सम्पद्येरन् सरसिरुहभूसम्पदोऽतीतसंख्याः ।
सम्पर्याप्तं किमु हृदय ते लुब्धलोलुभ्यमानं
यत्त्वं मोहं प्रतिपदमये गाहसे पङ्कसिन्धुम् ॥

१९

तत्तादृक्षप्रथितमहिमश्रीजुषामप्यमीषां
लोकेशानामपि शतमखब्रह्मवैरोचनीनाम् ।
द्रागज्ञातायतिगतिदशामापदं पश्यतोऽपि
प्रत्याशायामनुचितमिहाहैतुकं कौतुकं ते ॥

२०

आयुर्वायुप्लवनविवलत्पल्लवाग्रोदबिन्दुः
सम्पत्तिश्च प्रतिकलगलत्कुण्डिकावारिपूरः ।
संक्षीयन्ते तदपि नृपतेरन्तरद्वारवेद्यां
पश्योन्मोहं हृदय कुजना दुर्धनाराधनाय ॥

२१

पश्यन्तोऽपि प्रतिपदभवामापदं सम्पदुत्थां
पुत्रक्षेत्रप्रणयनिचयव्याधयः साधयामः ।
नानारूपैरभिनयपदैर्येन नानट्यमानाः
कुर्मस्तस्मै वयमिह नमश्चेतसे निर्घृणाय ॥

२२

निद्रातन्द्रीक्लमपरिभवप्राभृतप्रत्यवेक्षा
निर्वैलक्ष्ये विषमविषयक्ष्वेलनैकान्तलक्ष्ये ।
यातायातश्रमफलगतिव्यग्रविभ्रष्टशीले
सासौ सासौ भवति सति का या मनःक्षेमकांक्षा ॥

२३

अद्याशेऽपि श्वगतिगमिनस्ते दरिद्राणवृत्तेः
चेतश्चिन्ताहृतकणभुजः कार्धिराज्यं तदैन्द्रम् ।
निस्यातङ्कप्रकटमहितोत्थानदुःस्थासिकानां
इन्द्रादीनामथ यदि पदं लब्धमप्यस्ति किं ते ॥

२४

येभ्यो नाम स्पृहयसि मनःसारसम्पत्तिविद्या
वीर्यैश्वर्याद्यतिशयगुणैरात्मना तैर्बुभूषु ।
तानेवानुस्मरसि न कथामात्रशेषानशेषान्
येषामीषामियमपि कथा लुप्यते कल्पवेगात् ॥

२५

तान्यस्थीनि क्षतजमपि ततानि मांसानि सात्वक्
तेऽमी केशाः पृथगिति मनो यानि बीभत्ससे त्वम् ।
अन्तर्बाह्याशुचिघनगडुग्रन्थिलां सालभञ्जीं
यन्त्रालोलामभिलषसि यामङ्गना कामिनीति ॥

२६

शिल्पं कल्पक्षयविनिमयप्रत्ययप्रत्यवेयं
प्रादुष्कुर्वन्त्यसुलसुखयोश्चित्रनृत्यस्य विद्याः ।
कामादीनामफलनटनाडम्बरालम्बयष्टि-
स्तस्या मुष्टिन्धयनयकलाकौशलं तत्त्वविद्या ।

२७

हित्वा विद्यामयमयमहन्तन्ममेति ग्रहं त्वं
मोहादीनां पदमधिशिरो न्यस्य वामं रिपूणाम् ।
आकिञ्चन्यामृतरसपिबः(?) शान्तिसौभाग्यलक्ष्मीं
श्रेयःसौधे रमय हृदयानन्दसन्दोहदोग्ध्रीम् ॥

२८

अवधिनियतकालग्रस्तविध्यण्डगर्वे
विषयविवशवृत्ति नन्दति स्वेन लोकः ।
कुपितकपिकपोलोदुम्बरान्तःप्रमाथन्
मशककुलदशा सा चित्त ते चिन्तनीया ॥

२९

किमिह बहुभिरुक्तैः स्यादिदं मे न तत्स्या-
दिति विषमविमोहापोहमूहोपपत्त्या ।
अपरिमितमयत्नप्राप्यमाबाधहीनं
शमसुखमनुभोक्तुं युङ्क्ष्व निःश्रेयसाय ॥

३०

इति परममृतं यच्चित्तसम्बोधनाख्यं
रसयति रसनीयं सारनिःसारविज्ञः ।
विषमविषयवाञ्छामाशु निर्धूय शुद्ध्या
स नियतपमुशाम्यत्येति निर्वाणयोगम् ॥

३१

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
कृष्णानन्देन मुनिना मनःसम्बोधनं कृतम् ॥